शत्रुराशि एवं नीचराशिगत ग्रहों के फल —

निर्धनदुःखितमूढव्याधितबन्धाभितप्तवधभाजः।
एकोत्तरपरिवृद्ध्या नीचगतैः शत्रुगृहगैर्वा॥

अथैकादिभिर्नीचगतैर्ग्रहैर्जातस्य स्वरूपमाह — यस्मिन् कस्मिन् राशौ एकस्मिन् ग्रहे नीचगते शत्रुक्षेत्रगते वा जातो निर्धनो भवति द्वाभ्यां नीचगताभ्यां दुःखितः, त्रिभिर्मूढो विचेताः चतुर्भिर्व्याधितः, पञ्चभिर्बद्धः षड्भिरभितप्तवाक् सप्तभिर्वधभाग्भवति।

भावार्थः- यदि जन्म-समय एकोत्तर वृद्धि से अर्थात, एक, दो, तीन, चार, पाँच, छः या सात ग्रह अपने नीच या शत्रु ग्रह में हों तो जातक क्रमानुसार निर्धन, दुःखी, मूर्ख, रोगी, बन्धन का भागी (कारागार भोगने वाला), ताप से पीड़ित और वध-योग्य होता है। जैसे एक ग्रह नीच या शत्रुग्रह में हो तो जातक निर्धन, दो ग्रह हों तो दुःखी आदि होता है।

डॉ० सुदिवट कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुखसेना,
पूर्णियाँ।

शास्त्री-1 16.08.20

1

स्वोच्चगत ग्रहों के फल —

त्रिप्रभृतिभिरुच्चस्थैर्नृपवंशभवा भवन्ति राजानः।
पञ्चादिभिरन्यकुलोद्भवाश्च तद्वत्त्रिकोणगतैः॥

यस्य जन्मनि त्रयोग्रहाः उच्चगता भवन्ति स राजवंशजातस्तदा राजा भवति। यस्य चत्वारः सोऽपि राजवंशजो राजा भवति। यस्य जन्मनि पञ्च ग्रहा उच्चराशिगता भवन्ति स यदि अन्यकुलजातस्तदाऽपि राजा भवति। यस्य षड्ग्रहाः स अन्यकुलजातोऽपि राजा भवति। यस्य सप्त ग्रहाः सोऽपि। एकेनोच्चगतेन द्वाभ्यां च राजवंशजो राजा न भवति। यस्य सप्त ग्रहाः सोऽपि किं तर्हि धनी भवति। तत्रापि यथा यथोच्चस्था ग्रहा भवन्ति तथा तथाधिको धनी तद्वत्त्रिकोणगतैरपि त्रिचतुर्भिर्मूल त्रिकोणगतैः राजवंशजो राजा भवति। पञ्चषष्ठसप्तभिर्मूलत्रिकोणगतैरन्यवंशजोऽपि राजा भवति। अल्पैर्मूलत्रिकोणगैर्धनी भवति। यथा यथा बहवो ग्रहा मूलत्रिकोणस्था भवन्ति तथा तथाऽधिको धनी भवति।

भावार्थः— जन्म-समय यदि तीन या चार ग्रह उच्च के हों तो राजकुल में उत्पन्न जातक राजा होता है और पाँच से अधिक ग्रह उच्च के हों तो अन्य कुल में उत्पन्न जातक भी राजा होता है। इसी प्रकार त्रिकोणगत ग्रहों के भी फल समझने चाहिये।

डॉ० सुदिष्ट कुमार
सहा० प्राध्यापक (ज्योतिष)
रा० उ० सं० महावि० सुखसेना,
पूर्णियाँ।

(12) रक्तजिह्वा के भवन्ति ?

उत्तरम् - भोगिनः ।

(13) कृष्णतालुर्नरो यस्तु स भवेत् कुलनाशनः ।
विकृतं स्फुरितं तालुर्यस्य तस्य न शोभनम् ॥
कस्य वाक्यमिदम् ?

उत्तरम् - समुद्रस्य ।

(14) सौम्यञ्च संवृतं वक्त्रममलं यस्य देहिनः ।
महाराजो भवेन्नित्यं विपरीते तु निर्धनः ॥
इति कस्य वचनम् ?

उत्तरम् - समुद्रस्य ।

(15) स्त्रीमुखं निरपत्यानां मण्डलं शाठ्यसेविनाम् ।
दीर्घं मुखञ्च निःस्वानां भीरुवक्त्रा दुराशयाः ॥
इति कस्य वाक्यम् ?

उत्तरम् - समुद्रस्य ।

(16) स्निग्धमस्फुरिताग्रं च सन्नतं श्मश्रु चेष्यते ।
रक्तैरल्पैस्तथा रुक्षैः श्मश्रुभिस्तस्कराः स्मृताः ॥
कस्येदं पद्यम् ?

उत्तरम् - समुद्रस्य ।

(17) ऋज्वी स्वल्पच्छिद्रा नासा केषाम् ?

उत्तरम् - सभाग्यानाम् ।

(18) सकृत्क्षुतं भोगवतां द्विर्धनाय चिरायुषे ।
चतुः स्याद्रोगनाशाय परमस्मात् तदीशजाः ॥
इति कस्य वचनम् ?

उत्तरम् - पराशरस्य ।

डॉ० सुचित कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ० सं० महावि० सुखसेना,
पूर्णियाँ ।

वस्तुनिष्ठप्रश्नाः

शास्त्री-I, II

16.08.20
3

(1) सेनापतिः को भवति?

उत्तरम्- ताम्रवर्णनखी।

(2) पुत्रवान् को भवति?

उत्तरम्- यवमुक्ताङ्गुष्ठः।

(3) रूक्षाः रेखाः केषां भवन्ति?

उत्तरम्- निर्धनानाम्।

(4) नृपतेः मणिबन्धो कीदृशाः रेखाः भवन्ति?

उत्तरम्- मणिबन्धोऽपि यत्रास्तित्रयो रेखा।

(5) मीनयुग्माङ्कितपाणिः को भवति?

उत्तरम्- नित्यं सत्रप्रदः।

(6) ऐश्वर्यशाली को भवति?

उत्तरम्- स्वास्तिकरेखायुतः।

(7) सेनापतिः को भवति?

उत्तरम्- कुन्तरेखी।

(8) धार्मिकः को भवति?

उत्तरम्- श्रीवृक्षरेखी।

(9) यज्ञयाजी भवेन्नित्यं बहुवित्तश्च मानवः।
श्रीवत्समथवा पद्मं वज्रं चामरमेव च।
यस्य हस्ते तु दृश्येत स भवेत्पृथिवीपतिः॥
कस्य वाक्यमिदम्?

उत्तरम्- समुद्रस्य।

(10) निर्मांसैश्चिबुकैर्दीर्घैर्निर्द्रव्याश्चाशुवाचिनः।
समांसलैर्धनोपेता बहुपुत्रसमावृताः॥
कस्य वचनमिदम्?

उत्तरम्- वराहमिहिरस्य।

(11) बिम्बाधरोष्ठाः के भवन्ति?

उत्तरम्- राजानः।

P.T.O